# Panchmukhi Hanuman Kavach Lyrics

## श्री गणेशाय नमः

ॐ अस्य श्रीपञ्चमुख हनुमत्कवचमन्त्रस्य ब्रह्मा ऋषि:

## गायत्री छंद:

पञ्चमुख-विराट् हनुमान् देवता।
ह्रीं बीजम्॥

## श्रीं शक्ति:

क्रौं कीलकं। क्रूं कवचं। क्रैं अस्त्राय फट्।

## श्री गरुड़ उवाच

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वांगसुंदर,
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम्॥

पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम्,
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम्॥

पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभ,
दंष्ट्रा कराल वदनं भ्रुकुटिकुटिलेक्षणम्॥

अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम्,
अत्युग्र तेज वपुष् भीषणं भय नाशनम्॥

पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम्,
सर्व नाग प्रशमनं विषभूतादिकृन्तनम्॥

उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम्,
पातालसिंहवेतालज्वररोगादिकृन्तनम्॥

ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम्,
येन वक्त्रेण विप्रेन्द्र तारकाख्यं महासुरम्॥

जघान शरणं तत् स्यात् सर्व शत्रु हरं परम्,
ध्यात्वा पञ्चमुखं रुद्रं हनुमन्तं दयानिधिम्॥

खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम्,
मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुं॥

भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुङ्गवम्,
एतान्यायुधजालानि धारयन्तं भजाम्यहम्॥

प्रेतासनोपविष्टं तं सर्वाभरणभूषितम्,
दिव्य माल्याम्बरधरं दिव्यगन्धानुलेपनम्॥

सर्वाश्चर्यमयं देवं हनुमद्विश्वतो मुखम्,
पञ्चास्यमच्युतमनेकविचित्रवर्णवक्त्रं॥

शशाङ्कशिखरं कपिराजवर्यम्,
पीताम्बरादिमुकुटैरुपशोभिताङ्गं।
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि॥

मर्कटेशं महोत्साहं सर्व शत्रु हरं परं,
शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर॥

ॐ हरिमर्कट मर्कट मंत्र मिदं परि लिख्यति लिख्यति वामतले,
यदि नश्यति नश्यति शत्रुकुलं यदि मुञ्चति मुञ्चति वामलता॥

ॐ हरि मर्कटाय स्वाहा

ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारकाय स्वाहा।
ॐ नमो भगवते पञ्चवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा।
ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरुडाननाय सकलविषहराय स्वाहा।
ॐ नमो भगवते पंचवदनाय उत्तरमुखाय आदिवराहाय सकलसंपत्कराय स्वाहा।

ॐ नमो भगवते पंचवदनाय ऊर्ध्वमुखाय हयग्रीवाय सकलजनवशकराय स्वाहा।
ॐ श्री पंचमुख हनुमंताय आंजनेयाय नमो नमः॥